| CSM – 44/21 |
|---|
| Indian Language & Literature in Sanskrit |
| Paper – I |

*Time : 3 hours*

*Full Marks : 300*

*The figures in the right-hand margin indicate marks.*

*Candidates should attempt Q. No. 1 from Section – A and Q. No. 5 from Section – B which are compulsory and any* ***three*** *of the remaining questions, selecting at least* ***one*** *from each Section.*

## SECTION – A

1. कांश्चन **त्रीन्** विभागान उत्तरयत : 20×3 = 60

(क) अधोनिर्दिष्टाः संज्ञाः संसूत्रं सोदाहरणञ्च निरूपयत :

(i) संहिता

(ii) वृद्धिः

(iii) उपधा

(iv) सवर्णम्

(ख) अधोनिर्दिष्टानां समस्तपदानां समासनामानि विग्रहवाक्यानि च लिखत ।

(i) पाणिपादम्

(ii) महायशस्क:

(iii) षोडश

(iv) पुर्वाहन:

(v) यावच्छलोकम्

(ग) अधोनिर्दिष्टानां सूत्राणामर्थ सोदाहरणं प्रतिपादयत ।

(i) वान्तो यि प्रत्यये

(ii) लोप: शाकल्यस्य

(iii) एङि पररूपम्

(iv) यरोऽनुनासिकेऽनुनासिको वा

(v) वा शरि

(घ) सूत्रविशेषेण अधोनिर्दिष्टानां पदानां विभक्तिं निर्दिशत

(i) प्रभु: भृत्यं गृहं गमयति

(ii) मासम् आस्ते

(iii) माता पुत्रे स्निह्यति

(iv) गुरोः शास्त्रं शृणोति

(v) शिशवे क्रोडनकम् आनयति

2. वैदिकसंस्कृतस्य प्रमुखवैशिष्ट्यानां परिचयमेकं प्रदत्त । 60

3. भारतसंस्कृतौ रामायणस्य स्थानं निरूपयत । 60

4. नाट्यकाररूपेण भवभूतेः मूल्यांकनं कुरुत । 60

## SECTION – B

5. यथेच्छं **त्रयः** प्रश्नाः समाधेयाः : 20×3 = 60

(क) संस्कृतवाङ्मये आयुर्वेदविषयकानां ग्रन्थानां विवरणं प्रदत्त ।

(ख) शास्त्रकारैः विवाहसंस्कारः कथं व्यवस्थितः ?

(ग) पुरुषार्थेषु धर्मस्य यथार्थं स्वरूपं विचारयत ।

(घ) अर्थशास्त्रमनुसृत्य आन्वीक्षिकीस्थापनविषयमवलम्ब्य प्रबन्धमेकं रचयत ।

6. वेदान्तदर्शने जीवब्रह्मणोः सम्बन्धविषयं विस्तरेण प्रतिपादयत । 60

7. 'करोणाविषाणोः संक्रमणसामर्थ्य विषये भारतवर्षस्य जागरूकता' इत्यमुं शीर्षकम् अवलम्ब्य प्रबन्धमेकं रचयत (प्रायः त्रिशतशब्दैः) । 60

8. गद्यांशम् अमुम् उपाश्रित्य अधःप्रदत्ताः प्रश्नाः समाधेयाः :

10×6 = 60

'भू' इति धातुः सत्तारूपेऽर्थे वर्तते । सत्तेहात्मभरणमिति । न चोत्पत्तिः सत्ता, उत्पन्नस्यात्मधारणलक्षणमित्युक्तत्वात् । लोकेऽपि सत्ताजन्मनोभिन्नत्वादेव घटः किमुत्पद्यत इति पृष्टो न कश्चिदप्यस्तीति प्रतिवक्ति । धातुरनेकार्थाभिधायी, प्रादयस्तु प्रकरणादिवद् विशेषस्मृतिहेतवो द्योतकाः । द्योतकापेक्षा च शब्दशक्तिस्वाभाव्यात् क्वचिदेव, यथा हरिशब्दो भेकादावेव । अर्थनिर्देशोऽतन्त्रम् । यथा करोतिरभूतप्रादुर्भावे पठितोऽस्मानभितः पादौ कुरु, चोरंकारमक्रोशतीत्यादौ — चोरकार मित्यत्र चोरशब्दमुच्चार्य्येति ह्यर्थः, न त्वचोरश्चोरः क्रियते । अर्थनिर्देशस्योपलक्षणत्व एव कुर्द खुर्द गुर्द गुद क्रीडा-मेवेत्येवकारोत्पत्तिः । गाधृ प्रतिष्ठालिप्सयोरित्यादौ त्वनेकार्थाभिधानं प्रपञ्चार्थम् ।

प्रश्ना :

(क) 'सत्ता'शब्दस्य कोऽर्थः ?

(ख) प्रादयः द्योतकाः वाचकाः वा ? कथम् ?

(ग) कृधातोः अनेकार्थाभिधायित्वस्य निदर्शनम् प्रदत्त ।

(घ) चोरङ्कारमाक्रोशतीत्यस्य वाक्यस्य तात्पर्यार्थः कः ?

(ङ) अर्थनिर्देशस्य उपलक्षणत्वे किं प्रमाणम् ?

(च) प्रपञ्चार्थकस्य अनेकार्थाभिधानस्य उदाहरणं किम् ?